# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा - आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् — ३ | |
| विषयः - स्वामिनारायणवेदान्तः ( J ) | (C.C.- 5.3. 8 New ) | गुणाः - ७० |
| दिनाङ्कः - ११/१०/२०१९ | सन्दर्भग्रन्थः- कठोपनिषदः | समयः ३ तः ६ |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितयोरेक एव समाधेयः।** (५)

(१) कठोपनिषदः शान्तिमन्त्रं व्याख्यात।

(२) ''न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥

- इति मन्त्रं गोपालानन्दमुनिविरचितभाष्यानुसारं व्याख्यात।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** (१०)

(१) नचिकेतसा याचितानि त्रीणि वराणि विवृणुत।

(२) द्वितीयवल्लीमाधारीकृत्य जीवस्य स्वरूपं तदन्तर्यामिपरमात्मस्वरूपञ्च उपदर्शयत।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितयोरेक एव समाधेयः।** (५)

(१) उतिष्ठत जाग्रत प्राप्य वरान् निबोधत - इत्युपनिषद्वाक्यं परिचाययत।

(२) ''आत्मानं रथिनं विद्धि शरीरं रथमेव च।

बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥ इति मन्त्रं सान्वयं व्याख्यात।

**प्रश्नः ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** (१०)

(१) जीवब्रह्मणोः एकशरीरवर्तित्वे सत्यपि भिन्नत्वमुपपादयत।

(२) नचिकेतसं प्रति यमस्योपदेशं तृतीयवल्लीमाधारीकृत्य विवृणुत।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नलिखितयोरेक एव समाधेयः।** (५)

(१) इमानीन्द्रियाणि कस्मात् कारणात् पराङ् पश्यन्ति नान्तरात्मानम्? स्पष्टयत।

(२) ''यतश्चोदेति सूर्यो अस्तं यत्र च गच्छति।

तं देवास्सर्वे अर्पितास्तदु नात्येति कश्चन॥''

- इति मन्त्रं गोपालानन्दमुनिविरचितभाष्यानुसारं व्याख्यात।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) चतुर्थवल्ल्याः सारभागं सङ्गृह्णीत।

(२) ''पराञ्चि खानि व्यतृणत् स्वयंभूः तस्मात् पराङ् पश्यन्ति नान्तरात्मन्।
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥''

– इति मन्त्रं भाष्योक्तदिशा परिचाययत।

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितयोरेक एव समाधेयः।** **(५)**

(१) परब्रह्मणः परमात्मनः प्रकृत्यपेक्षया विलक्षणत्वं प्रतिपादयत।

(२) ''न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥'' इति मन्त्रं व्याख्यात।

**प्रश्नः ८ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) कठोपनिषदः पञ्चमवल्ल्यां प्रदर्शितम् एकस्यैव परमात्मनः सर्वान्तरात्मत्वमुपपादयत।

(२) कठोपनिषदः षष्ठवल्ल्याः सारभागं संगृह्णीत।

**प्रश्नः ९ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः।** **(१०)**

(१) कठोपनिषदि कस्या आख्यानम् उपवर्ण्यते ?

(२) ''वाजश्रवसः'' इतीदं पदं व्याख्यात।

(३) स्वर्गे लोके किं नास्ति ?

(४) श्रेयः प्रेयोमार्गयोर्मध्ये को भेदः ?

(५) धीरः पुरुषः कं मार्गं वृणीते ?

(६) शरीरे हन्यमानेऽपि कः न हन्यते ?

(७) पञ्चाग्नयः के ?

(८) हृदयगुहायां कौ प्रविष्टौ ?

(९) सुखदुःखादिभोक्ता कः ?

(१०) के विततस्य मृत्योः पाशं यन्ति ?

(११) सर्वे देवाः कम् अर्पिता ?

(१२) सर्वेषु चेतनेषु सुप्तेषु कः जागर्ति ?

(१३) कठोपनिषदः पञ्चमवल्ल्यां कति मन्त्राः सन्ति ?

(१४) संसाररूपाश्वत्थः कृदीशोऽस्ति ?

(१५) कठोपनिषदि कति वल्ल्यः सन्ति ?

--००--